# श्रीदेवी खड्गमाला स्तोत्रम्

प्रार्थना
ह्रीङ्कारासन गर्भितानल शिखां सौः क्लीङ्कलां बिभ्रतीं
सौवर्णाम्बर धारिणीं वरसुधा धौतां त्रिनेत्रोज्ज्वलाम् ।
वन्दे पुस्तक पाशमङ्कुश धरां स्रग्भूषिता मुज्ज्वलां
त्वां गौरीं त्रिपुरां परात्परकलां श्रीचक्र सञ्चारिणीम् ॥

ध्यानम्
आरक्ताभां त्रिनेत्रां अरुणिम वसनां रत्न ताटङ्क रम्यां
हस्ताम्भोजैस्स पाशाङ्कुश मदन धनुस्सायकै र्विस्फुरन्तीम् ।
आपी नोत्तुङ्ग वक्षोरुह कलश लुठत्तार हारोज्ज्वलाङ्गीं
ध्याये दम्भोरु हस्थां अरुणिम वसनां ईश्वरी मीश्वराणाम् ॥

ॐ नमस्त्रिपुरसुन्दरि,
न्यासाङ्गदेवताः -६
हृदयदेवि, शिरोदेवि, शिखादेवि, कवचदेवि, नेत्रदेवि,
अस्त्रदेवि,

तिथिनित्यादेवताः -१६
कामेश्वरि, भगमालिनि, नित्यक्लिन्ने, भेरुण्डे, वह्निवासिनि,
महावज्रेश्वरि, शिवदूति, त्वरिते, कुलसुन्दरि, नित्ये,
नीलपताके, विजये, सर्वमङ्गले, ज्वालामालिनि, चित्रे, महानित्ये,

दिव्यौघगुरवः -७

परमेश्वर-परमेश्वरि, मित्रेशमयि, षष्ठीशमयि, उड्डीशमयि,
चर्यानाथमयि, लोपामुद्रामयि, अगस्त्यमयि,

सिद्धौघगुरवः -४
कालतापशमयि, धर्माचार्यमयि, मुक्तकेशीश्वरमयि, दीपकलानाथमयि,

मानवौघगुरवः -८
विष्णुदेवमयि, प्रभाकरदेवमयि, तेजोदेवमयि, मनोजदेवमयि,
कल्याणदेवमयि, वासुदेवमयि, रत्नदेवमयि, श्रीरामानन्दमयि,

श्रीचक्र प्रथमावरणदेवताः -३२
अणिमासिद्धे, लघिमासिद्धे, गरिमासिद्धे, महिमासिद्धे,
ईशित्वसिद्धे, वशित्वसिद्धे, प्राकाम्यसिद्धे, भुक्तिसिद्धे,
इच्छासिद्धे, प्राप्तिसिद्धे, सर्वकामसिद्धे,
ब्राह्मि, माहेश्वरि, कौमारि, वैष्णवि,
वाराहि, माहेन्द्रि, चामुण्डे, महालक्ष्मि,
सर्वसङ्क्षोभिणि, सर्वविद्राविणि, सर्वाकर्षिणि,
सर्ववशङ्करि, सर्वोन्मादिनि, सर्वमहाङ्कुशे, सर्वखेचरि,
सर्वबीजे, सर्वयोने, सर्वत्रिखण्डे,
त्रैलोक्य-मोहन-चक्रस्वामिनि, प्रकट-योगिनि,

श्रीचक्र द्वितीयावरणदेवताः -१८
कामाकर्षिणि, बुद्ध्याकर्षिणि, अहंकाराकर्षिणि, शब्दाकर्षिणि,
स्पर्शाकर्षिणि, रूपाकर्षिणि, रसाकर्षिणि, गन्धाकर्षिणि,
चित्ताकर्षिणि, धैर्याकर्षिणि, स्मृत्याकर्षिणि, नामाकर्षिणि,

बीजाकर्षिणि, आत्माकर्षिणि, अमृताकर्षिणि, शरीराकर्षिणि,
सर्वाशा-परिपूरक-चक्र-स्वामिनि, गुप्तयोगिनि,

श्रीचक्र तृतीयावरणदेवताः -१०
अनङ्गकुसुमे, अनङ्गमेखले, अनङ्गमदने, अनङ्गमदनातुरे,
अनङ्गरेखे, अनङ्गवेगिनि, अनङ्गाङ्कुशे, अनङ्गमालिनि,
सर्व-सङ्क्षोभण-चक्रस्वामिनि, गुप्ततरयोगिनि,

श्रीचक्र चतुर्थावरणदेवताः -१६
सर्वसङ्क्षोभिणि, सर्वविद्राविनि, सर्वाकर्षिणि,
सर्वह्लादिनि, सर्वसम्मोहिनि, सर्वस्तम्भिनि, सर्वजृम्भिणि,
सर्ववशङ्करि, सर्वरञ्जनि, सर्वोन्मादिनि, सर्वार्थसाधिके,
सर्वसम्पत्तिपूरिणि, सर्वमन्त्रमयि, सर्वद्वन्द्वक्षयङ्करि,
सर्व-सौभाग्य-दायक-चक्रस्वामिनि, सम्प्रदाययोगिनि,

श्रीचक्र पञ्चमावरणदेवताः -१२
सर्वसिद्धिप्रदे, सर्वसम्पत्प्रदे, सर्वप्रियङ्करि,
सर्वमङ्गलकारिणि, सर्वकामप्रदे, सर्वदुःखविमोचनि,
सर्वमृत्युप्रशमनि, सर्वविघ्ननिवारिणि, सर्वाङ्गसुन्दरि,
सर्वसौभाग्यदायिनि,
सर्वार्थ-साधक-चक्र-स्वामिनि, कुलोत्तीर्ण-योगिनि,

श्रीचक्र षष्ठावरणदेवताः -१२
सर्वज्ञे, सर्वशक्ते, सर्वैश्वर्य प्रदायिनि, सर्वज्ञानमयि,
सर्वव्याधि विनाशिनि, सर्वाधार स्वरूपे, सर्वपापहरे,

सर्वानन्दमयी, सर्वरक्षा स्वरूपिणि, सर्वेप्सित-फलप्रदे,
सर्व-रक्षाकर-चक्र-स्वामिनि, निगर्भयोगिनि,

श्रीचक्र सप्तमावरणदेवताः -१०
वशिनि, कामेश्वरि, मोदिनि, विमले, अरुणे, जयिनि,
सर्वेश्वरि, कौलिनि,
सर्वरोग-हर-चक्रस्वामिनि, रहस्ययोगिनि,

श्रीचक्र अष्टमावरणदेवताः -९
बाणिनि, चापिनि, पाशिनि, अङ्कुशिनि,
महाकामेश्वरि, महावज्रेश्वरि, महाभगमालिनि,
सर्व-सिद्धिप्रद-चक्रस्वामिनि, अतिरहस्य-योगिनि,

श्रीचक्र नवमावरणदेवताः -३
श्री श्रीमहाभट्टारिके,
सर्वा-नन्दमय-चक्रस्वामिनि, परापर-रहस्य-योगिनि,

नवचक्रेश्वरी नामानि -९
त्रिपुरे, त्रिपुरेशि, त्रिपुरसुन्दरि, त्रिपुरवासिनि,
त्रिपुराश्रीः, त्रिपुरमालिनि, त्रिपुरासिद्धे, त्रिपुराम्बा,
महात्रिपुरसुन्दरि,

श्रीदेवी विशेषणानि - नमस्कारनवाक्षरीच -९
महामहेश्वरि, महामहाराज्ञि, महामहाशक्ते, महामहागुप्ते,
महामहाज्ञप्ते, महामहानन्दे, महामहास्कन्धे, महामहाशये,

महामहा श्रीचक्र-नगर-साम्राज्ञि,
नमस्ते नमस्ते नमस्ते नमः ।

फलश्रुतिः
एषा विद्या महासिद्धि दायिनी स्मृति मात्रतः ।
अग्निवात महाक्षोभे राजा राष्ट्रस्य विप्लवे ॥

लुण्ठने तस्करभये सङ्ग्रामे सलिलप्लवे ।
समुद्रयान विक्षोभे भूत प्रेतादिके भये ॥

अपस्मार ज्वरव्याधि मृत्यु क्षामादिजे भये ।
शाकिनी पूतना यक्ष रक्षःकूष्माण्डजे भये ॥

मित्रभेदे ग्रहभये व्यसनेष्वाभिचारिके ।
अन्येष्वपि च दोषेषु मालामन्त्रं स्मरेन्नरः ॥

सर्वोपद्र वनिर्मुक्त स्साक्षाच्छिवमयो भवेत् ।
आपत्काले नित्यपूजां विस्तारा-त्कर्तु मारभेत् ॥

एकवारं जपध्यानं सर्वपूजा फलं लभेत् ।
नवावर्ण देवीनां ललिताया महौजसः ॥

एकत्र गणनारूपो वेदवेदाङ्ग गोचरः ।
सर्वागम रहस्यार्थः स्मरणात्पाप नाशिनी ॥

ललिताया महेशान्या माला विद्या महीयसि ।

नरवश्यं नरेन्द्राणां वश्यं नारीवशङ्करम् ॥

अणिमादि गुणैश्वर्यं रञ्जनं पाप भञ्जनम् ।
तत्तदावरण-स्थायि देवतावृन्द मन्त्रकम् ॥

मालामन्त्रं परं गुह्यं परं धाम प्रकीर्तितम् ।
शक्तिमाला पञ्चधास्याच् छीवमाला च तादृशी ॥

तस्माद्गोप्य तराद्गोप्यं रहस्यं भुक्ति मुक्तिदम् ॥

इति श्रीवामकेश्वर तन्त्रे उमामहेश्वर संवादे
देवी-खड्गमाला-स्तोत्र-रत्नं समाप्तम् ।